## श्रीदेवराजगुरुभिरनुगृहिता

# ॥ उत्तरदिनचर्या ॥

# Uttaradinacharya

इति यतिकुलधुर्यमेधमानैः श्रुतिम वुरैरुदितैः प्रहर्षयन्तम् ।
वरवरमुनिमेव चिन्तयन्ती मतिरियमेति निरत्ययं प्रसादम् ॥१ ॥
अथ गोष्ठीं गरिष्ठानामधिष्ठाय सुमेधसाम् ।
वाक्यालङ्कृ तिवाक्यानां व्याख्यातारं नमामि तम् ॥२ ॥
सायन्तनं ततः कृत्वा सम्यगाराधनं हरेः ।
स्वैरालापैः शुभैश्श्रोतॄन्नन्दयन्तं नमामि तम् ॥३ ॥
ततः कनकपर्यङ्के तरुणद्युमणिद्युतौ ।
विशालविमलश्लक्ष्णतुङ्गतूलासनोज्ज्वले ॥४ ॥
समग्रसौरभोद्गारनिरन्तरदिगन्तरे ।
सोपधाने सुखासीनं सुकुमारे वरासने ॥५ ॥
उन्मीलत्पद्नगर्भद्युतितलमुपरि क्षीरसङ्घातगौरं
राकाचन्द्रप्रकाशप्रचुरनखमणिद्योतविद्योतमानम् ।
अङ्गुल्यग्रेषु किञ्चिन्नतमतिमृ दुलं रम्यजामातृयोगी
दिव्यं तत्पादयुग्मं दिशतु शिरसि मे देशिकेन्द्रो दयालुः ॥६ ॥
त्वं मे बन्धुस्त्वमसि जनकस्त्वं सखा देशिकस्त्वं ।
विद्या वृत्तं सुकृतमतुलं वित्तमप्युत्तमं त्वम् ।
आत्मा शेषी भवसि भगवन्नान्तरश्शासिता त्वं
यद्वा सर्वम् वरवरमुने ! यद्यदात्मानुरूपम् ॥७ ॥
अग्रे पश्चादुपरि परितो भूतलं पार्श्वतो मे
मौलौ वक्त्रे वपुषि सकले मानसाम्भोरुहे च ।
दर्शम् दर्शम् वरवरमुने दिव्यमङ्घ्रिद्वयं ते
नित्यं मज्जन्नमृतजलधौ निस्तरेयं भवाब्धिम् ॥८ ॥
कर्माधीने वपुषि कुमतिः कल्पयन्नात्मभावं

दुःखे मग्नः किमिति सुचिरं दूयते जन्तुरेषः ।
सर्वे त्यक्त्वा वरवरमुने ! सम्प्राति त्वत्प्रसादाद्दिव्यं
प्राप्तुस्तव पदयुगं देहि मे सुप्रभातम् ॥९ ॥
या या वृत्तिर्मनसि मम सा जायतां संस्मृतिस्ते
यो यो जल्पस्स भवतु ! विभो ! नामसङ्कीर्तनं ते ।
या या चेष्टा वपुषि भगवन् ! सा भवेद्वन्दनं ते
सर्वम् भूयाद्वरवरमुने ! सम्यगाराधनं ते ॥१० ॥
अपगतमदमानैरन्तिमोपायनिष्ठैः
अधिगतपरमार्थैरर्थकामानपेक्षैः ।
निखिलजनसुहृद्भिर्निर्चितक्रोधलोभै
वरवरमुनिभृत्यैरस्तु मे नित्ययोगः ॥११ ॥
इति स्तुतिनिबन्धेन सूचितस्वमनीषितान् ।
भृत्यान् प्रेमार्द्रया दृष्टया सिञ्चन्तं सिन्तयामि तम् ॥१२ ॥
अथ भृत्याननुज्ञाप्य कृत्वा चेतश्शुभाश्रये ।
शयनीयं परिष्कृत्य शयानं संस्मरामि तम् ॥१३ ॥
दिनचर्यामिमां दिव्यं रम्यजामातृयोगिनः ।
भक्तया नित्यमनिध्यायन् प्राप्नोति परमं पदम् ॥१४ ॥

इति उत्तरदिनचर्या समाप्ता ॥